.. ૐ શ્રીગણેશાય નમઃ ..

અસ્ય શ્રીરામરક્ષાસ્તોત્રમંત્રસ્ય . બુધકૌશિક ઋષિઃ .
શ્રીસીતારામચંદ્રો દેવતા . અનુષ્ટુપ્ છંદઃ .
સીતા શક્તિઃ . શ્રીમદ્ હનુમાન કીલકમ્ .
શ્રીરામચંદ્રપ્રીત્યર્થે રામરક્ષાસ્તોત્રજપે વિનિયોગઃ ..

.. અથ ધ્યાનમ્ ..

ધ્યાયેદાજાનુબાહું ધૃતશરધનુષં બદ્ધપદ્માસનસ્થમ્ .
પીતં વાસો વસાનં નવકમલદલસ્પર્ધિનેત્રં પ્રસન્નમ્ .
વામાંકારૂઢ સીતામુખકમલમિલલ્લોચનં નીરદાભમ્ .
નાનાલંકારદીપ્તં દધતમુરુજટામંડનં રામચંદ્રમ્ ..

.. ઇતિ ધ્યાનમ્ ..

ચરિતં રઘુનાથસ્ય શતકોટિ પ્રવિસ્તરમ્ .
એકૈકમક્ષરં પુંસાં મહાપાતકનાશનમ્ .. ૧..

ધ્યાત્વા નીલોત્પલશ્યામં રામં રાજીવલોચનમ્ .
જાનકીલક્ષ્મણોપેતં જટામુકુટમંડિતમ્ .. ૨..

સાસિતૂણધનુર્બાણપાણિં નક્તંચરાન્તકમ્ .
સ્વલીલયા જગત્રાતું આવિર્ભૂતં અજં વિભુમ્ .. ૩..

રામરક્ષાં પઠેત્પ્રાજ્ઞઃ પાપઘ્નીં સર્વકામદામ્ .
શિરોમે રાઘવઃ પાતુ ભાલં દશરથાત્મજઃ .. ૪..

કૌસલ્યેયો દૃશૌ પાતુ વિશ્વામિત્રપ્રિયશ્રુતી .
ઘ્રાણં પાતુ મખત્રાતા મુખં સૌમિત્રિવત્સલઃ .. ૫..

જિહ્વાં વિદ્યાનિધિઃ પાતુ કંઠં ભરતવંદિતઃ .
સ્કંધૌ દિવ્યાયુધઃ પાતુ ભુજૌ ભગ્નેશકાર્મુકઃ .. ૬..

કરૌ સીતાપતિઃ પાતુ હૃદયં જામદગ્ન્યજિત્ .
મધ્યં પાતુ ખરધ્વંસી નાભિં જામ્બવદાશ્રયઃ .. ૭..

સુગ્રીવેશઃ કટી પાતુ સક્થિની હનુમત્પ્રભુઃ .
ઊરૂ રઘૂત્તમઃ પાતુ રક્ષઃકુલવિનાશકૃત્ .. ૮..

જાનુની સેતુકૃત્પાતુ જંઘે દશમુખાન્તકઃ .
પાદૌ બિભીષણશ્રીદઃ પાતુ રામોખિલં વપુઃ .. ૯..

એતાં રામબલોપેતાં રક્ષાં યઃ સુકૃતી પઠેત્ .
સ ચિરાયુઃ સુખી પુત્રી વિજયી વિનયી ભવેત્ .. ૧૦..

પાતાલભૂતલવ્યોમચારિણશ્છદ્મચારિણઃ .
ન દ્રષ્ટુમપિ શક્તાસ્તે રક્ષિતં રામનામભિઃ .. ૧૧..

રામેતિ રામભદ્રેતિ રામચંદ્રેતિ વા સ્મરન્ .
નરો ન લિપ્યતે પાપૈઃ ભુક્તિં મુક્તિં ચ વિન્દતિ .. ૧૨..

જગજ્જૈત્રૈકમંત્રેણ રામનામ્નાભિરક્ષિતમ્ .
યઃ કંઠે ધારયેત્તસ્ય કરસ્થાઃ સર્વસિદ્ધયઃ .. ૧૩..

વજ્રપંજરનામેદં યો રામકવચં સ્મરેત્ .
અવ્યાહતાજ્ઞઃ સર્વત્ર લભતે જયમંગલમ્ .. ૧૪..

આદિષ્ટવાન્ યથા સ્વપ્ને રામરક્ષાંમિમાં હરઃ .
તથા લિખિતવાન્ પ્રાતઃ પ્રબુદ્ધો બુધકૌશિકઃ .. ૧૫..

આરામઃ કલ્પવૃક્ષાણાં વિરામઃ સકલાપદામ્ .
અભિરામસ્ત્રિલોકાનાં રામઃ શ્રીમાન્ સ નઃ પ્રભુઃ .. ૧૬..

તરુણૌ રૂપસંપન્નૌ સુકુમારૌ મહાબલૌ .
પુંડરીકવિશાલાક્ષૌ ચીરકૃષ્ણાજિનામ્બરૌ .. ૧૭..

ફલમૂલાશિનૌ દાન્તૌ તાપસૌ બ્રહ્મચારિણૌ .
પુત્રૌ દશરથસ્યૈતૌ ભ્રાતરૌ રામલક્ષ્મણૌ .. ૧૮..

શરણ્યૌ સર્વસત્ત્વાનાં શ્રેષ્ઠૌ સર્વધનુષ્મતામ્ .
રક્ષઃ કુલનિહંતારૌ ત્રાયેતાં નો રઘૂત્તમૌ .. ૧૯..

આત્તસજ્જધનુષાવિષુસ્પૃશાવક્ષયાશુગનિષંગસંગિનૌ .
રક્ષણાય મમ રામલક્ષ્મણાવગ્રતઃ પથિ સદૈવ ગચ્છતામ્ .. ૨૦..

સન્નદ્ધઃ કવચી ખડ્ગી ચાપબાણધરો યુવા .
ગચ્છન્મનોરથોસ્માકં રામઃ પાતુ સલક્ષ્મણઃ .. ૨૧..

રામો દાશરથિઃ શૂરો લક્ષ્મણાનુચરો બલી .
કાકુત્સ્થઃ પુરુષઃ પૂર્ણઃ કૌસલ્યેયો રઘુત્તમઃ .. ૨૨..

વેદાન્તવેદ્યો યજ્ઞેશઃ પુરાણપુરુષોત્તમઃ .
જાનકીવલ્લભઃ શ્રીમાન્ અપ્રમેય પરાક્રમઃ .. ૨૩..

ઇત્યેતાનિ જપન્નિત્યં મદ્ભક્તઃ શ્રદ્ધયાન્વિતઃ .
અશ્વમેધાધિકં પુણ્યં સંપ્રાપ્નોતિ ન સંશયઃ .. ૨૪..

રામં દુર્વાદલશ્યામં પદ્માક્ષં પીતવાસસમ્ .
સ્તુવંતિ નામભિર્દિવ્યૈઃ ન તે સંસારિણો નરઃ .. ૨૫..

રામં લક્ષ્મણપૂર્વજં રઘુવરં સીતાપતિં સુંદરમ્ .
કાકુત્સ્થં કરુણાર્ણવં ગુણનિધિં વિપ્રપ્રિયં ધાર્મિકમ્ .
રાજેંદ્રં સત્યસંધં દશરથતનયં શ્યામલં શાંતમૂર્તિમ્ .
વંદે લોકાભિરામં રઘુકુલતિલકં રાઘવં રાવણારિમ્ .. ૨૬..

રામાય રામભદ્રાય રામચંદ્રાય વેધસે .
રઘુનાથાય નાથાય સીતાયાઃ પતયે નમઃ .. ૨૭..

શ્રીરામ રામ રઘુનંદન રામ રામ .
શ્રીરામ રામ ભરતાગ્રજ રામ રામ .
શ્રીરામ રામ રણકર્કશ રામ રામ .
શ્રીરામ રામ શરણં ભવ રામ રામ .. ૨૮..

શ્રીરામચંદ્રચરણૌ મનસા સ્મરામિ .
શ્રીરામચંદ્રચરણૌ વચસા ગૃણામિ .
શ્રીરામચંદ્રચરણૌ શિરસા નમામિ .
શ્રીરામચંદ્રચરણૌ શરણં પ્રપદ્યે .. ૨૯..

માતા રામો મત્પિતા રામચંદ્રઃ .
સ્વામી રામો મત્સખા રામચંદ્રઃ .
સર્વસ્વં મે રામચંદ્રો દયાલુઃ .
નાન્યં જાને નૈવ જાને ન જાને .. ૩૦..

દક્ષિણે લક્ષ્મણો યસ્ય વામે તુ જનકાત્મજા .
પુરતો મારુતિર્યસ્ય તં વંદે રઘુનંદનમ્ .. ૩૧..

લોકાભિરામં રણરંગધીરમ્ .
રાજીવનેત્રં રઘુવંશનાથમ્ .
કારુણ્યરૂપં કરુણાકરં તમ્ .
શ્રીરામચંદ્રમ્ શરણં પ્રપદ્યે .. ૩૨..

મનોજવં મારુતતુલ્યવેગમ્ .
જિતેન્દ્રિયં બુદ્ધિમતાં વરિષ્ઠમ્ .
વાતાત્મજં વાનરયૂથમુખ્યમ્ .
શ્રીરામદૂતં શરણં પ્રપદ્યે .. ૩૩..

કૂજંતં રામ રામેતિ મધુરં મધુરાક્ષરમ્ .
આરુહ્ય કવિતાશાખાં વંદે વાલ્મીકિકોકિલમ્ .. ૩૪..

આપદાં અપહર્તારં દાતારં સર્વસંપદામ્ .
લોકાભિરામં શ્રીરામં ભૂયો ભૂયો નમામ્યહમ્ .. ૩૫..

ભર્જનં ભવબીજાનાં અર્જનં સુખસમ્પદામ્ .
તર્જનં યમદૂતાનાં રામ રામેતિ ગર્જનમ્ .. ૩૬..

રામો રાજમણિઃ સદા વિજયતે રામં રમેશં ભજે .
રામેણાભિહતા નિશાચરચમૂ રામાય તસ્મૈ નમઃ .
રામાન્નાસ્તિ પરાયણં પરતરં રામસ્ય દાસોસ્મ્યહમ્ .
રામે ચિત્તલયઃ સદા ભવતુ મે ભો રામ મામુદ્ધર .. ૩૭..

રામ રામેતિ રામેતિ રમે રામે મનોરમે .
સહસ્રનામ તત્તુલ્યં રામનામ વરાનને .. ૩૮..

ઇતિ શ્રીબુધકૌશિકવિરચિતં શ્રીરામરક્ષાસ્તોત્રં સંપૂર્ણમ્ ..

.. શ્રીસીતારામચંદ્રાર્પણમસ્તુ ..

Please send corrections to sanskrit@cheerful.com
Last updated January 26, 1999